# .. Renuka Saptakam ..

# ॥ શ્રીરેણુકાસપ્તકમ્ ॥

## Document Information

Text title : reNukAsaptakam
File name : reNukAsaptakam.itx
Location : doc_devii
Author : Shri Vasishtha Ganapati Muni
Language : Sanskrit
Subject : philosophy/hinduism/religion
Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com
Description-comments : From Complete works. Vol 2.13
Latest update : July 3, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીરેણુકાસપ્તકમ્ ॥

શ્રીગણેશાય નમઃ ।

પુરતો વિલોક્ય વૃષભં પાર્શ્વે લિઙ્ગં પરાત્પરસ્ય વિભોઃ ।
પૃષ્ઠે સ્કન્દગણેશૌ ત્વાં કાલીં મન્મહે માતઃ ॥ ૧॥

ન ત્વં લક્ષ્મીમાતઃ યલ્લક્ષ્મીનાયકસ્ય માતાઽસિ ।
જનયિત્રિ રાક્ષસારેઃ તસ્માત્ત્વાં મન્મહે કાલીમ્ ॥ ૨॥

સંહારનાયિકત્વાત્ મારીત્વાદુગ્રવેષરૂપત્વાત્ ।
મધ્યમલોકનિવાસાત્ ત્વાં કાલીં મન્મહે માતઃ ॥ ૩ ॥

જમદગ્નિઃ શિવભાગઃ ભાગસ્ત્વં દેવિ શૈલકન્યાયાઃ ।
એવં જ્ઞાત્વા યસ્ત્વાં ભજતિ સ ધન્યો મહાભાગઃ ॥ ૪॥

ત્વાં ચણ્ડિકાં પ્રચણ્ડામાહુસ્તન્ત્રાણિ જનિમતાં માતઃ ।
તસ્માત્ત્વં શિવકાન્તા ન શ્રીર્ન પ્રેયસી ચ વિધેઃ ॥ ૫॥

ગૌરી શ્રીર્વા વાગ્વા ન વિશેષો જગતિ ભક્તલોકસ્ય ।
મમ તુ વિશિષ્ટા ગૌરી સાક્ષાદસ્યાઃ સુતો યદહમ્ ॥ ૬॥

તિસૃષુ  પરદેવતાસુ શ્રેષ્ઠત્વં નોચ્યતે મયૈકસ્યાઃ ।
પ્રીતિર્મે ગિરિજાયાં લક્ષ્મીતો ભારતીતશ્ચ ॥ ૭॥

॥ ઇતિ શ્રીભગવન્મહર્ષિરમણાન્તેવાસિનો વાસિષ્ઠસ્ય
નરસિંહસૂનોર્ગણપતેઃ કૃતિઃ રેણુકાસપ્તકં સમાપ્તમ્ ॥

From Complete works of Shri Vasishtha Ganapati Muni Vol. 2.13
Proofread by Kaushal S. Kaloo  kaushalskaloo  at  gmail.com

.. Renuka Saptakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*